https://universitynews.in/

Total No. of Pages : 4]

4008

A-95

[Total No. of Questions

# B.A. (Part - III) EXAMINATION - 2021
## SANSKRIT
## First Paper
## संस्कृत साहित्यम
## भारतीय धर्म दर्शनं च

*Duration : 90 Minutes]* *[Max. Marks : 100*

*अवधि : 90 Minutes]* *[पूर्णांक : 100*

*Instructions to the candidates :*

**Attempt questions to the extent of 50% of maximum marks of the question paper. Any question with or without 'or' or from any unit/section/part may be chosen.**

प्रश्न पत्र के किसी भी इकाई/भाग/खंड में से स्वेच्छा से इस प्रकार प्रश्नों का चयन करें कि प्रश्न पत्र के पूर्णांक में से अधिकतम 50% अंकों के प्रश्न हल हो सकें। 'अथवा' के साथ दिए प्रश्नों में भी किसी प्रकार की बाध्यता नहीं है।

दाहिनी ओर प्रश्न के अंक दिये गए हैं।

https://universitynews.in

*Q1)* अधोलिखितेषु कयोश्चिद् द्वयोः सप्रसङ्ग व्याख्या विधेया- [7½+7½]

क) सर्वव्यवहार हेतुर्गुणो बुद्धिर्ज्ञानम्। सा द्विविधा-स्मृतिः अनुभवश्च।

संस्कारजन्यं ज्ञानं स्मृतिः, तद्भिन्नं ज्ञानमनुभवः। सः द्विविधः-

यथार्थोऽयथार्थश्च।

ख) त्वगिन्द्रिय मात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः-शीतोष्णानुष्णाशीतभेदात्।

पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्ण स्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः।

ग) चलनात्मकं कर्म। ऊर्ध्व - देश- संयोग - हेतुरूत्क्षेपणम्।

अधोदेश- संयोगहेतुरपक्षेपणम्। शरीरसन्निकृष्ट संयोगहेतु राकुञ्चनम्।

शरीर विप्रकृष्ट संयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।

*P.T.O.*

https://universitynews.in/

*Q2)* अधोलिखितेषु केषांचित चतुर्ष्णां प्रश्नानांम् उत्तराणि देयानि– [8]

क) सत्येन् किं रक्ष्यते?

ख) कं मूढ़चेतसं उच्यते?

ग) के गुणा: पुरूषं दीपयन्ति?

घ) जीवलोकस्य षड्सुखानि कानि सन्ति?

ङ) पुरूषेण के–के दोषा हातव्या?

च) लोके केषां भोक्तुं शक्ति: न विद्यते?

छ) शक्तानां भूषणं किं भवति?

ज) असाधू नां बलं कि भवति?

*Q3)* अधोलिखितेषु कयोश्चिद् द्वयो: श्लोकयो: ससंदर्भ व्याख्या कार्या – [12]

क) विशंकमानो भवत: पराभवं, नृपासनस्थोऽपि वनाधिवासिन:।
दुरोदर च्छद्मजितां समीहते, नयेन जेतुं जगतीं सुयोधन:।।

ख) प्रलीन भूपालमपि स्थिरायति।
प्रशासदावारिधि मण्डलं भुव:।।
स चिन्तयत्येव भियस्त्वदेष्यति,
रहो दुरन्ता बलवद्विरोधितां।।

ग) अवन्ध्य कोपस्य विहन्तुरापदां,
भवन्ति वश्या: स्वयमेव देहिन:।
अमर्षशून्येन जनस्य जन्तुना,
न जात हार्देन न विद्विषादर:।।

घ) इमामहं वेद न तावकीं धियं,
विचित्ररूपा: खलु चित्त वृत्तय:।
विचिन्तयन्त्या भवदापदं परां,
रूजन्ति चेत: प्रसभं ममाधय:।।

*Q4)* अधोलिखितेषु केषाञ्चित् चतुर्ण्णां प्रश्नानामुत्तराणि देयानि– [8]

क) किरातार्जुनीयम् महाकाव्यस्य शुभारम्भ केन शब्देन अभवत्?

ख) किरातार्जुनीयं महाकाव्यस्य प्रथम सर्गे किं नाम छन्द: प्रयुक्तं कविना?

ग) कीदृशं वच: दुलर्भं अस्ति?

घ) कै समं विरोध: वरं भवति?

ङ) पठितस्य अस्य महाकाव्यस्य नायक: क: अस्ति?

च) द्रुपदात्मजा का अस्ति?

छ) महाकवे: भारवे: किं प्रसिद्धम्?

ज) वनेचर: युधिष्ठिरं प्रति कुत्र समाययो?

https://universitynews.in/

*Q5)* अधोलिखितेषु द्वयो: श्लोकयो: सप्रसंग व्याख्या करणीया - [12]

क) लभेत सिकतासु तैलमपि यत्नत: पीडयन्,
पिबेच्च मृग तृष्णिकासु सलिलं पिपासार्दित:।
कदाचिदपि पर्यटञ्शश विषाणमासादये -
न्न तु प्रतिनिविष्ट मूर्खजन चित्तमाराधयेत्।

ख) लाङ्गूल चालनमधश्चरणावपातं,
भूमौ निपत्य वदनोदर दर्शनं च।
श्वा पिण्डदस्य कुरूते गजपुङ्गवस्तु,
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते।।

ग) तानीन्द्रियाण्य विकलानि तदेव नाम,
सा बुद्धिरप्रतिहता वचनं तदेव।
अर्थोष्मणा विरहित: पुरूष स एव,
त्वन्य: क्षणेन भवतीति विचित्रमेतत्।।

घ) य: प्रीणयेत्सुचरितै: पितरं स पुत्रो,
यद् भर्तुरेव हितमिच्छति तत्कलत्रम्।
तन्मित्रमापदि सुखे च समक्रियं य-,
देतत्त्रयं जगति पुण्यकृतो लभन्ते।।

*Q6)* अधोलिखितेषु केषाञ्चित् चतुर्णां प्रश्नानामुत्तराणि देयानि - [8]

क) सतां मैत्री कीदृशी भवति?

ख) सन्मित्रस्य लक्षणानि कानि सन्ति?

ग) करूणापराणां पाणि: केन विभाति?

घ) क: परिहर्तव्य भवति?

ङ) नृपनीति: का इव अनेकरूपा भवति?

च) सत्सङ्गति: पुसां किं करोति?

छ) केषां यश: काये जरामरणजं भयं नास्ति?

ज) सुखं आराध्य: क: भवति?

*Q7)* निम्नलिखितेषु कमप्येकं विषयमधिकृत्य संस्कृत भाषायां निबन्ध: लेख्य: - [10]

क) स्त्रीशिक्षाया: महत्वम्।

ख) विद्याधनं सर्वधनप्रधानम्।

ग) संस्कृति संस्कृताश्रिता।

घ) सत्सङ्गति:।



https://universitynews.in/

https://universitynews.in/

*Q8)* अधोलिखितेषु कयो: द्वयो: सूत्रयो: सोदाहरणं व्याख्या कार्या – [10]

क) कर्तरि शप् ।

ख) एरू:।

ग) आर्धधातुकस्येड् वलादे:।

घ) लुट: प्रथमस्य डारौरस:।

*Q9)* निम्नलिखितेषु पञ्चपदानां सूत्रोल्लेख पूर्वकं सिद्धि: करणीया। [10]

क) भवति | ख) भविष्यति

ग) एधते | घ) अदन्ति

ङ) जुहोति | च) दीव्यन्ति

छ) सुनोति | ज) तुदति

झ) रूणाद्धि | ञ) तनोति

*Q10)* निम्नलिखितं गद्यांश पठित्वा प्रश्नानामुत्तराणि संस्कृतभाषायां देयानि।

मानवजीवने श्रमस्य महत्वं सर्वे जानन्ति। मानव: श्रममाश्रित्यैव सुखसमृद्धिं प्राप्नोति। जन: सुखं वाञ्छति, मनोरथं पूरयितुमभिलषति, जीवने समुन्नतिं कांक्षते, तत्सर्वस्य साधनं श्रममेव वर्तते। श्रम एव मानवस्य स्वाभिमानं शारीरिक-शक्तिं च प्रसारयति, सर्वेषु कार्येषु तस्य दक्षतामापादयति। अत एव क्षमेणैव सर्वत्र साफल्यं मिलति।

जनै: सदा श्रम: कर्तव्य: यत: सम्पत्तेरूद्भवोभवति, यतो हि व्यर्थं परिश्रमं कुर्वन् नर: पाप भाक् भवति। प्रज्ञा: तुर्येऽपि वयसि परमं श्रमं न त्यजेयु:। यस्मिन् देशे जना: पूर्ण श्रमपरायणा: भवन्ति, तत्र वसुन्धरा धनैर्धान्यै: पूर्णा विराजते। धिषणा श्रमसंयोग: सर्व कार्येषु सिद्धिद: भवति। अश्रमा धिषणा व्यर्था भवति तथा च अधिषण: श्रम: व्यर्थ: भवति अतएव स्वस्य लोकस्य चोन्नतये सदैव श्रम: कर्तव्य:।

अ) उपर्युक्त गद्यांशस्य शीर्षकं देयम्। [2]

आ) उपर्युक्त गद्यांशस्य संस्कृत भाषायां सार संक्षेपं करणीयम्। [3]

अधोलिखितानां प्रश्नानामुत्तराणि देयानि–

क) मानव: श्रममाश्रित्यैव कां प्राप्नोति? [1]

ख) किम् कुर्वन नर: पापभाक् भवति? [1]

ग) कस्मिन् देशे वसुन्धरा धनधान्यै: पूर्णा विराजते? [1]

घ) सर्वकार्येषु सिद्धिद: क: भवति? [1]

ङ) जनै: सदा कीदृश: श्रम: कर्तव्य:? [1]

OOOO



https://universitynews.in/